॥पञ्च० ज्ञानंसाक्षाद्देवसमाश्रितं॥२९॥सात्विकंदेवदेवस्यसमाराधनकर्मजं॥मो
॥२॥ क्षमार्गेष्वसततंमृग्यमाणंदुरासदं॥३०॥संवर्तः॥उक्तंनकपिलेनैवंपश्चा
द्यनमहात्मना॥इतितेयन्मयव्याख्यातंतत्सर्वंप्रवीमिते॥३१॥सार्धकोटि
प्रमाणेनब्रह्मणाकृतंचाकुलं॥कपिलायतनाप्प्राल्लक्षाणांपंचकंपुनः॥
॥३२॥कपिलोपिचयमाप्यप्रहृष्टोल्लक्षमात्रया॥पश्चादपिदत्तमात्मस्थंसपु-
नंग्रंथसंख्यया॥३३॥यस्मात्स्वोपदिष्टंतत्तस्मात्सात्वतमोहतः॥मोक्षैकफ
लदंधर्मंमाधर्मात्मिन्प्रजायते॥३४॥तेनैवाथेनधर्मेणप्रसन्नोकपिलामहः
माराधयंमहादेवंहरिंनारायणंप्रभुं॥३५॥यज्ञेनयज्ञंयष्टव्यंअयजंतोनिरन्त
श्रुतिः॥आद्यंधर्मंसमारूढायेयजंतेविचक्षणाः॥३६॥तेषांनिवर्त्यावंज्ञा
नंपुनरावृत्तिवर्जितं॥एवंसर्वेपुकुर्वंस्तुमानवपुमुमुक्षुषु॥३७॥सृष्टिक्षणो
महानासीत्सात्वकीसृष्टिणाकृता॥पंचकालपराःसर्वेसर्वेचभगवन्मया॥ ॥राम॥
३८॥नान्यंयजंतेश्चार्याःनित्यःतनारायणात्परः॥एवंकार्तयुगंधर्मंवर्तमा- २

नमद्धामुने॥४९॥लोककर्त्तास्वयंब्रह्मानारायणमुपागमत्॥दृष्ट्वाचहृषी
केशंपुंडरीकाक्षंविध्यथा॥५०॥भूमौदंडप्रणामंचकृत्वातूष्णींव्यवतिष्ठत॥
श्रीभगवानुवाच॥लोकाःकिंनानुवर्तंतेदासवत्तववाक्यतः॥ब्रह्मन्नानाधि-
कारावाधाव्यंनःकिंनुराक्षसैः॥५२॥त्वदीयंचापदंमासुंतपस्तप्यतुकिंसुराः
इत्युक्तोदेवदेवेनप्रत्यभाषतपद्मभूः॥५३॥ब्रह्मा॥भगवन्भूतभव्येशमम
श्चर्यमिजायते॥त्वयिसर्वंत्रकुशलंवर्ततेसर्वकालिकं॥५४॥किंनुवक्ष्यामि
देवप्रश्नहृदानाजितंदृष्ट्याः॥महारहस्यमाख्याययुंजंतेसर्वमानवाः॥५५॥त
यांतिवैष्णवंस्थानंपुनरावृत्तिवर्जितं॥नस्वर्गोनापिनरकोनजन्ममरणद्भ
५६॥संवर्तैः॥इत्युक्तोब्रह्मणादेवःशंखचक्रगदाधरः॥पार्श्वस्थंरुद्रमालो-
क्यत्याजहारस्वयंहरिः॥५७॥श्रीभगवानुवाच॥षट्प्रकाराणितंत्राणि
त्वंदैवत्यानिशंकर॥परस्परंविरुद्धानिकुरुष्वत्वंयथार्थतः॥५८॥अवतारे
ष्ववहुभिर्मत्स्यादिभिरहंपुनः॥त्वत्प्रणीतानिशास्त्राणिस्थापयामिमही

नत्वं॥ ४९॥ अल्पायासेनसुलभंभूयिष्ठंफलमद्भुतं॥ षट्प्रकारेचशास्त्रेस्मि
नद्वैतीयस्यकारणं॥ ५०॥ योगशास्त्रस्यकर्त्तात्वंविरिंचोधिकरिष्यते॥ ५१
सांख्यस्यचापिनिर्माणंकापिलोधिकरिष्यते॥ बुद्धमूर्तिंसमास्थायबुद्धशा-
स्त्रंभजाम्यहं॥ ज्ञानापन्नपानिस्नातंज्ञात्वज्ञेयापलापिच॥ ५२॥ आर्हतंत्रिमू-
र्तिमास्थायशास्त्रंशास्मितथार्हतं॥ पांचरात्राभिधंशास्त्रंमयापूर्वंकृतंकिल
॥ ५३॥ कापालंरुद्रशैवंचतथापाशुपतंत्रयं॥ क्रूरधर्माणिशास्त्राणित्वद्दै
त्यानिशंकर॥ ५४॥ शास्त्राणिमत्प्रणीतानिभवाद्यैर्योकृतानिच॥ आभूतः
संप्लवंलोकस्यास्यंतिममशासनात्॥ ५५॥ वाढमित्यवनेसर्वेप्रणिपत्याच्युतं
हरिं॥ कृतकृत्यस्तदाब्रह्मामाधवेदेवसमालयं॥ ५६॥ जगामासिद्धगंधर्वचार
णादिभिरन्वितः॥ सर्वतः॥ पंचरात्रेणतुल्यानितदाप्रभृतिवैमुने॥ शैवादी
न्यपिशास्त्राणिप्रथितेशासनान्तरैः॥ ५७॥ वैलव्यामायुयालोकेप्रचरंति-
निरंकुशाः॥ ५८॥ शैवादयोपिसमयास्तत्रतत्रप्रतिष्ठिताः॥ पंचैतरेपंच

गत्रमदूषितमपिस्वयं॥ ४९॥ दूषयंत्येवमूढत्वात्तदूषायितुमीश्वरे॥ पापं-
डधुनिरस्तापुरुहनुवादानिकुलता॥ ५०॥ जायंतेविष्णुमायाभिः पतितानांदुरात्म
नां॥ नास्तिकानांदकानानाघोरैर्भिः परिपीडिताः॥ ५१॥ जायंतेचाश्रियंते-
चपच्यंतेनिरयेष्वपि॥ स्वर्गेपुनर्वसंत्यस्ममायामलिनचेतसः॥ ५२॥ तरंतिचभ
वांभोधिंमाययायेवहिष्कृताः॥ आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः
॥ ५३॥ नारायणात्परंध्यानमुक्तंतिब्रह्मवादिनः॥ ब्राह्मणासर्ववर्णेषुयथश्रेष्ठोत्तम
पूत्तमः॥ ५४॥ यद्वद्गंगाचतीर्थेषुदेवतेष्वपिचाच्युतः॥ तद्वत्सर्वेषुशास्त्रेषु-
पंचरात्रंप्रशस्यते॥ ५५॥ पंचरात्रोक्तविधिनायःसमाराधयेद्धरिं॥ कैवल्यंप
रमंप्राप्नोतिनभूयःसंसरेदिह॥ ५६॥ असंख्यंफलमाप्नोतिसपुमान्नात्रसंशयः॥
कल्याणकारिणस्तस्यपितरःस्वर्गवासिनः॥ ५७॥ ब्रह्मलोकंपिपुरुषंनकाकथा
नरकार्णवे॥ मंत्रेश्चवैष्णवैर्दत्तंहव्यंवाकव्यमेववा॥ नददात्यंभवेत्तेनतृप्यंति
पितृदेवताः॥ आस्फोटयंतिपितरःप्रनृत्यंतिपितामहाः॥ ५८॥ वैष्णवोजात-

॥पञ्च० ॥५॥ येनैषामन्वयेभुमहामतिः॥ पंचरात्रोक्तविधिनावासुदेवंसमाश्रितः॥ १०
नारायणामृतंध्यानंनिरुक्ताशेषविकृतं॥ एतच्छास्त्रंनदातव्यंशिष्यानायभ्यसू
यवे॥ ११॥ मासमाणायनान्यस्मैकस्मैचनयदृच्छया॥ त्रैवर्णिकायदातव्यंभक्ष्य
तव्यंचवेदवत्॥ १२॥ कृष्णः॥ महोपनिषदाख्यस्यशास्त्रस्यास्यमहामते॥ पं
चरात्रसमाख्यासौकथंलोकेप्रवर्तते॥ १३॥ मेचतेः॥ पंचतराणिशास्त्राणिरा
त्रीयंतेमहांस्यपि॥ तस्मात्रिधौसमाख्यासौतत्रलोकेप्रवर्तते॥ १४॥ चंद्रतारा
गणायद्वत्शोभतेनैववासरः॥ तथेतराणिशोभंतेपंचतेनाम्यसंनिधौ॥ १५॥
पंचतमथवायद्वद्दीप्यमानोदिवाकरः॥ रुद्धंतिरात्रयस्तद्वदितराणितदंति-
के॥ १६॥ इदंपवित्रंपापघ्नंशास्त्रंभवविनाशनं॥ संसारार्णवमग्नानांकर्मपा
शानुपयुषां॥ १७॥ महापोतेनसदृशंतारकंभवसागरात्॥ ऋग्वादिसंज्ञकाः
वेदाश्चतुर्वोभिधेनयथा॥ १८॥ तद्वत्सिद्धांतभेदेनपंचरात्रंचतुर्विधं॥ ऋग्वा
दसायथैकैकंभिघेनवहुशाखया॥ १९॥ तथासिद्धांतमेकैकंतच्छभेदेनभि ॥राम॥ ॥५॥

ष्यते॥ सिद्धांतंनामचान्वर्थंनिगदंतिपंडिताः॥८०॥मीमांसादिषुशास्त्रे
षुपरसिद्धांतमनीषिणः॥तेषांमतेनधिकारोस्मिन्शास्त्रेतेनान्यथागतिः॥८१
एकमूर्तिप्रधानंतंमंत्रसिद्धांतमुच्यते॥चतुर्मूर्तिप्रधानंचयत्तदागमपूर्वकं
॥८२॥सिद्धांतमुच्यतेसद्भिर्द्विनायंत्राकारविश्रुतं॥नवमूर्तिप्रधानंचतंत्रमित्यभि
तमुच्यते॥८३॥चतुर्वक्त्रांतचक्रपादेवयत्राच्चर्नाविधिः॥तच्चंत्रांतरमित्यस्या
तंत्रमतत्वनुविधं॥८४॥चनत्वः कथिताः पूर्वंवासुदेवादयस्तथा॥नारायणो
हयग्रीवोविष्णुर्नृसिंहसूकरौ॥८५॥सांकर्यंतनुकुर्वीतसिद्धांतेषुपरस्परं॥
यदिसंकरतामोहाद्राजाराष्ट्रंविनश्यति॥८६॥यत्नात्सिद्धांतमार्गेणकर्षणादि
क्रियाकृता॥तत्तेनैवप्रकर्तव्यंकर्मकुर्यात्तंत्रविभागवित्॥८७॥तन्त्रांतरेण सं
स्यात्सर्वंस्वर्वफलप्रदाः॥तस्मात्मंत्रसिद्धांतः पापसंज्ञाभिधीयते॥८८॥ए
केकतंत्रभेदेनसिद्धांताबहुधास्मृताः॥मंत्राद्यविस्तरश्चैवतंत्राणांप्रकटीकृ
तः॥८९॥सिद्धांतेमंत्रमोसिद्धिःशिष्याणांहितकाम्यया॥तेषांभाणांचैवसर्वै

॥पंच० पांचरात्रनारायणस्वयं॥९०॥अनुग्रहार्थंभक्तानांश्रावयामासतत्स्वयं॥श्रोता
॥५॥ नारोमूर्तिभेदाश्चमुनयश्चपितामहाः॥९१॥प्रयोजनंचशास्त्रस्यमोक्षःप्रकृ
तिदुर्लभः॥अभिधेयंभगवतःसमाराधनमुत्तमं॥९२॥संबंधोविषयेतसाद्धि
साध्यसाधनलक्षणः॥श्रुतिमूलमिदंतंत्रंप्रमाणंकल्पसूत्रवत्॥९३॥सर्गसर्गे
ष्वविधिर्लिखिदंवदेवस्यशासनात्॥चिंतामणिर्यथालोकेशावृक्षोकल्पकद्रुमः॥
॥९४॥अर्थिभ्योवांछितंसर्वंप्रयच्छंतिगतिर्विना॥पंचरात्राख्यरत्नंतुचतुर्वर्गफ
लप्रदं॥९५॥शास्त्रांतरव्यसनिनामभ्यासःकालयापनं॥फलंवाकिंचिदेवस्या
च्चतसाधुर्विहरूतं॥९६॥वासुदेवंपरित्यज्ययोन्यदेवमुपासते॥नरकायभ
वेत्तेनात्रकार्याविचारणा॥९७॥सत्यंसत्यंपुनःसत्यंउत्क्षिप्यभुजमुच्यते॥वे
दशास्त्रात्परंनास्तिनदेवंकेशवात्परं॥९८॥तस्माद्भक्तस्तदेवरोविधिनानेनत-
र्पमुते॥कण्वः॥कानिभद्रास्तुतंत्राणांनामधेयानिकानिवा॥श्रोतुमिच्छामि ॥राम॥
निर्भेदपरंकौतूहलंहिमे॥१००॥संवर्त्तः॥शतमेकंतथाष्टौचपुराहकण्वस्क ॥५॥

श्रुमः॥नामधेयानिचैतेषांश्रूयतांकथ्यतेमया॥१०१॥पाद्मंपद्मोद्भवंमा-
यावैभवंनलकूबरं॥त्रैलोक्यमोहनंविष्णुतिलकंपरमाहृयं॥१०२॥नार-
दीयंनचनादियंवासिष्ठंपौष्कराहृयं॥सनत्कुमारंसनकंसत्याख्यंनिरवसंहि
ता॥१०३॥सनंताख्यंमहीप्रश्नंश्रीप्रश्नंपुरुषोत्तमं॥माहेंद्रसंहितापद्म प्र-
श्नाख्यंनलसागरं॥१०४॥वागीशंयालवंतेजोद्राविणंश्रीकराहृयं॥सात्वतं
विष्णुसद्भावंमिश्रांतंविष्णुपूर्वकं॥१०५॥विहगेशंचकौमारंरहस्यंविष्णु
पूर्वकं॥विहगेंद्रमाविकंसर्वसौम्यमीश्वरसंहिता॥१०६॥अनंताख्यंभागव
तंजयाख्यंमूलसंहिता॥पुष्कलंत्रैशौनकीयंमारीचंदक्षसंहिता॥१०७॥सौ
पर्णयोगहृदयंहारीतंपारमेश्वरं॥आत्रेयंमौद्गरंविष्वक्सेनमौशनसाहृ-
यं॥१०८॥वैहायसंविहगेंद्रंभार्गवंपरपूरुषं॥याज्ञवल्क्यंगौतमीयंपौल-
स्त्यंशाकलाहृयं॥१०९॥जयान्तरं॥ज्ञानार्णवंज्ञानमद्रम्यंयाम्यंनारायणात्म
कं॥पाराशर्यंचजाबालंकापिलंवामनाहृयं॥११०॥जयान्तरंबार्हस्पत्यं

जैमिनंसात्वताह्वयं॥कात्यायनीकंवाल्मीकमौपगायनसंहिता॥१११॥हैर
॥पद्म०॥ ण्यगर्भमागस्त्यंकालैबोधायनाह्वयं॥नारद्वाजंनारसिंहंगार्ग्यमुत्तरपूर्वकं
॥५॥ ॥११२॥शातातपंमांगिरसंकाश्यपंपैंगलाह्वयं॥चैत्रारथ्यंविजयंवागनार
दीयंचवारुणं॥११३॥सुखांचांबरमाग्नेयंमार्कंडेयस्यसंग्रहः॥महासनत्कु
माराख्यंआत्माख्यंविश्वसंहिता॥११४॥मार्कंडेयंपार्षदंब्रह्मनारदसंहिता॥
संवादंशंकरब्रह्मांड्योउमामाहेश्वराह्वयं॥११५॥दत्तात्रेयंचसर्वाख्यंवाराहंमि
हिराह्वयं॥संकर्षणाख्यंप्रद्युम्नंवामनंकल्किराघवौ॥११६॥शान्तलाख्य
मित्यनंतानमषांतरंज्ञानं॥एतानितंत्रनामानिमयाख्यातानिमहामते॥११७॥
तंत्राण्यनेकानुक्तानिमुख्यप्रायाःपृथक्पृथक्॥इतितंत्रंसमाख्यातंशास्त्रम
वंमनीषिभिः॥११८॥तंत्राणांनामधेयानियानित्यंपठतेनरः॥सर्वपापै
र्विनिर्मुक्तोयातिब्रह्मसनातनं॥११९॥इतिपंचरात्रेमहोपनिषदिपाद्मेतं ॥राम॥
त्रेज्ञानपादेशास्त्रावतारकथनंनामप्रथमोध्यायः॥१॥१॥संवर्तः॥हू ॥५॥

पन्ननागराजेंद्रश्रुतवानस्मियत्पुरा ॥ तत्रंतदहमध्याप्यामयिचेतस्त्वनुग्रहः
॥१॥ पद्मउवाच ॥ तत्प्रवक्ष्यामिविप्रर्षेतंत्रंत्रैलोक्यविश्रुतं ॥ ज्ञानयोगक्रिया
चर्याचतुष्पादसमन्वितं ॥२॥ रहस्यमद्भुतंदिव्यंयन्मयाकपिलाद्धृतं ॥ मांस
पंचमहार्थंचसर्वसिद्धिप्रसादनं ॥३॥ सार्धकोटिप्रमाणंतद्ब्रह्मणाकेशवा-
द्धृतं ॥ तस्मात्समुद्धृतंतंत्रंवाग्भिरमृतंयथा ॥४॥ विज्ञानमादौसकलंसृष्टुपा
लयातमुच्यते ॥ ततोयोगक्रियापश्चाच्चर्याचतदनंतरं ॥५॥ विज्ञानंभगवद्ज्ञा-
नंतज्ज्ञानंमुक्तिरुच्यते ॥ आदिमध्यांतरहितंअर्चिस्तहृदयमच्युतं ॥६॥ नित्यंत
द्रूपमव्यक्तंनित्यवृद्धंनिरंजनं ॥ सर्वाकारंनिराकारंतमसःपरमव्ययं ॥७॥
तत्कारणवशात्तस्मादाविरासीत्सनातनात् ॥ द्विहस्तमेकवक्त्रंचशुद्धस्फटि-
कसंनिभं ॥८॥ सहस्ररविवह्निंदुलक्षकोटिसमप्रभं ॥ मरीचिचक्रमध्यस्थं
चक्राद्यायुधलांछनं ॥९॥ श्रीवत्सकौस्तुभोरस्कंवनमालाविराजितं ॥ कि
रीटहारकेयूरवलयादिविभूषितं ॥१०॥ पीतांबरधरंसौम्यंरूपमाद्यमना-

मयं॥सवासुदेवोविज्ञेयःशून्यंसर्वंचतुर्मुखात्॥११॥ध्येयंचयोगिभिर्नित्यं
॥पद्म० हृत्पद्मांतरविष्टरे॥पश्यंतिसूरयःशश्वत्तद्विष्णोःपरमंपदं॥१२॥वासुदेवात्
॥७॥ तोजातोवासुदेवाह्वयोपरः॥एकवक्त्रश्चतुर्बाहुश्चक्राद्यायुधभूषितः॥१३
स्थित्यैचक्रंसरसिजंदधानःसृष्टयेपुनः॥मुक्तयेपांचजन्यंचगदांसंहृतयेत-
था॥१४॥श्रीवत्सकौस्तुभोरस्कोवनमालाविभूषितः॥मयूरकंठवच्छ्यामः
पीतनैसर्गिकांबरः॥सवासुदेवोभगवान्सृष्टिस्थित्यंतमुक्तिदः॥आत्मानं
सद्विधात्वंकेपुनःकेनापिहेतुना॥१६॥तयोरेकोवासुदेवःशुभ्रस्फटिकसं-
निभः॥नारायणोद्वितीयस्तुनीलांबुदसमप्रभः॥१७॥संकर्षणोवासुदेवा
त्तस्मात्प्रद्युम्नसंभवः॥प्रद्युम्नादनिरुद्धोभूत्सर्वएतेचतुर्भुजाः॥१८॥ज्ञाना
दिगुणसामान्योवासुदेवःप्रकीर्तितः॥षष्ठ्योगुणानांवैषम्यव्यूहेतन्मूर्तयः
क्रमात्॥१९॥ज्ञानाधिकोभवेद्ब्रह्मन्हयोसंकर्षणाह्वयः॥बलाधिकःप्रद्यु- ॥राम॥
म्नस्यादैश्वर्येचानिरुद्धकः॥२०॥मूर्तिभ्यश्चचतुर्भ्यश्चचतुर्विंशतिमूर्तयः ॥७॥

जायंतेक्रमशोब्रह्मन्दीपाद्दीपांतरंयथा॥२१॥सर्वेचतुर्भुजाःपद्मशंखच-
क्रगदाधराः॥वासुदेवादादिदेवाद्यथमाकेशवस्तथा॥२२॥नारायणोमा-
धवश्चजज्ञिरेमुनिसत्तम॥संकर्षणाच्चगोविंदोविष्णुश्चमधुसूदनः॥२३॥
त्रयस्तेममजायंतप्रद्युम्नाच्चत्रिविक्रमः॥वामनःश्रीधरश्चैतज्जज्ञिरेमुनिस-
त्तम॥२४॥अनिरुद्धाद्धृषीकेशपद्मनाभश्चसत्तम॥दामोदरश्चतेनैवंदाद
शांश्चाप्रजज्ञिरे॥२५॥वासुदेवाच्चतन्नामतथासंकर्षणादपि॥प्रद्युम्नाद
पितन्नामतन्नामैवानिरुद्धकात्॥२६॥अभूवन्क्रमशस्तस्माच्चतुर्भ्यःपुरु-
षोत्तमः॥अधोक्षजोनृसिंहश्चचतुर्थश्चाच्युतोमतः॥२७॥चतुर्भ्यएवते
भ्यामीजज्ञिरेचयथाक्रमं॥जनार्दनस्तथोपेंद्रोहरिःकृष्णःसमाख्यया॥
२८॥वासुदेवादादिदेवान्मूर्त्यष्टकमजायत॥ब्राह्मीचमूर्तिःप्रथमाप्राजा-
पत्याचवैष्णवी॥२९॥दिव्याचार्षीमानुषीचसप्तमीचासुरीमता॥पैशा
चीचरमातासांमूर्तीनामपरापरा॥३०॥मीनाद्याजज्ञिरेविप्रचतुर्व्यूहा

यथाक्रमं॥मत्स्यःकूर्मोवराहश्चवासुदेवादजायत॥३१॥नृसिंहोवामनोरा-
मोरामदग्न्योप्यजायत॥संकर्षणात्तथाजज्ञेप्रद्युम्नाद्राघवोबली॥३२॥अनि-
रुद्धादभूत्कृष्णःकल्कीनिरुद्धमूर्तयः॥संकर्षणात्पुरुषःसत्यःप्रद्युम्नसंभ-
वः॥३३॥जातोच्युतोनिरुद्धाच्चप्रद्युम्नाल्लोकमोहनः॥दाशार्हःशौरिरेतेंशा
वासुदेवाद्विजज्ञिरे॥३४॥संकर्षणाद्धयग्रीवःशंखोदरस्तुकेसरी॥वैकुंठःसु-
र्नैराध्यानुमुकुंदश्चतथाकपिः॥३५॥तत्रैवादिवराहश्चततःसंकर्षणादपि-
अनंतःपन्नगोजातःसहस्रफणवान्बली॥३६॥सुदर्शनाद्यायुधानिकिरीटा-
दीनिभूषणं॥मूर्त्यौविभोर्वनमयसहैवैनालिर्जज्ञिरे॥३७॥देव्यःश्रियादय-
स्तत्तमूर्तिभेदंसमाश्रिताः॥श्रीवत्सादयसकल्लाजज्ञिरेदिव्यलांछनाः॥३८॥
गरुडःपक्षिणामिंद्रोवाहनोबलिनांवरः॥वासुदेवादिमूर्तिभ्यश्चंदोमूर्तिर-
जायत॥३९॥कुमुदाद्याश्चभूतयाःसर्वैःपार्षदैसह॥पादतश्चानिरुद्धस्य ॥राम॥
समभूवनसहस्रशः॥४०॥सहस्रशीर्षाचरणहस्तनेत्राद्युलाकृतः॥अनिरु- ८

प्राज्ञगजाह्वयांगादेवयथाक्रमं ॥ ५१ ॥ मुखादिंद्रश्च वह्निश्च छंदांस्यंगानि
षट्तथा ॥ श्रोत्रान्मूर्ध्नो नयनात्सूर्यो मनसश्चंद्रमा अपि ॥ ५२ ॥ श्रोत्राद्दिशो नभोना
भेः पद्भ्यां भूमिरजायत ॥ प्राणाद्वायुस्तथापानान्मृत्युः सर्वान्नियामकः ॥ ५३
त्रुट्यादिकालभेदश्च कालश्चाभूत्तथाधिपः ॥ वनस्पतय ओषधयो रोमकूपा
द्विनिस्सृताः ॥ ५४ ॥ यज्ञाश्च गर्भिगिरस्तस्माद्दृचोबहुदक्षिणाः ॥ चातुर्वर्ण्यं च
मात्मुखबाहूरुचरणाद्भवं ॥ ५५ ॥ एवं सृष्ट्वा जगत्सर्वं विश्वरूपधरो हरिः ॥ आ
स्तेनंतासने देवः श्रीभूमिभ्यां सहप्रभुः ॥ ५६ ॥ मध्ये क्षीरार्णवे श्वेतद्वीपाख्ये
हेमनिर्मिते ॥ आनादैसेव्यमानश्च योगिभिर्विविधैरपि ॥ ५७ ॥ त्वंद्राद्यैद्वार
पालैश्च कुमुदाद्यैस्तु जीविभिः ॥ पक्षींद्रविष्वक्सेनाभ्यां सेव्यमानो मुदान्वि-
तः ॥ ५८ ॥ श्रीवत्सवक्षा नित्यश्रीर्जयः पारवतोसुतः ॥ अनिरुद्धो जगत्स्वां
दौरिंद्राद्यैः परिपालयन् ॥ ५९ ॥ इति पंचरात्रे महोपनिषदि पाद्मे तंत्रे ज्ञान-
पादे सृष्टिकथनं नाम द्वितीयोध्यायः ॥ २ ॥ पद्मभूरुवाच ॥ ब्रह्मणः सृष्टि

रघुनाथस्यतेहिजसत्तम॥नारायणात्प्रजन्तोयंतत्रैवासीन्महार्णवः॥१॥अ
निरुद्धांराजादुर्गेमायारूपात्कमोहिनी॥त्वम्बाथमसृजत्तस्मिन्मायारूपम
हाद्रुम॥२॥अनिरुद्धोराजन्श्रीमान्पद्मनाभःपुरातनः॥संहृत्यलोकान्पुरु
षःपर्णपर्यंकमाश्रितवान्॥३॥तत्रपुंसःशयानस्यनागपर्यंकभूषिते॥हिर
ण्मयंपद्मगर्भेनाभेरंडमजायत॥४॥तदंडंपंचभूतात्मभूतंरत्नमलांकितं
मंडस्यवर्तमानस्यमध्येपद्मंसितप्रभं॥५॥सहस्रदलपर्यंतमंतःकेसरमं
डितं॥मध्येकर्णिकयायुक्तंअद्भुतंसृष्टिकारणं॥६॥सृष्टारमसृजत्तस्मिन्
पद्मनाभश्चतुर्मुखं॥आसनंब्रह्मणोयस्मात्पद्ममासीत्प्रभूततः॥७॥अन्य
थामर्थेदेवानामासनंपद्ममिष्यते॥सनंदनादीनसृजत्सृष्ट्यर्थंपद्मभूस्व
यं॥८॥सृष्टंमत्वानदधिरेतत्त्वज्ञायंभुवास्वरा॥सर्वेतेयोगिनोज्ञानवीत
रागाविमत्सराः॥९॥तेष्वेवंनिरपेक्षेषुलोकसृष्टौमहात्मसु॥ब्रह्मणोभू
न्महाक्रोधस्त्रैलोक्यदहनक्षमः॥१०॥भृकुटीकुटिलात्तस्यललाटात्का

धरीपितात्॥समुत्पन्नस्तदारुद्रोयुगांताग्निसमप्रभः॥११॥अर्धनारीन
रवपुःमहाकायःप्रतापवान्॥सांविभज्यात्मनोदेहंनरंनारींचनिर्ममे॥१२
मिथुनान्यसृजत्तस्माद्रुद्राणांकोटयस्तथा॥सर्वेचतुर्भुजाःक्रूरास्त्रिनेत्राःशू
लपाणयः॥१३॥तेषुप्रधानानिर्भंरुद्राएकादशस्मृताः॥रुद्रसृष्टिमिमांपद्म
स्ताव्यर्थामालोक्यलोककृत्॥१४॥मरीच्यादीन्दशपुत्रान्मनसानिर्ममेपुनः
तैरेतदखिलंसृष्टंत्रैलोक्यंसचराचरं॥१५॥एवंसृष्ट्वाजगदिदंपद्मयोनिः
श्चतुर्भुजः॥ध्यानंपरममातस्थौकारणंस्वस्यचिंतयन्॥१६॥ध्यायतस्तस्य
पुरतःतेजःपुंजोभवाभवत्॥दिवाकरसहस्राभंविद्युत्संगातसंनिभं॥१७
तन्मध्येपुरुषश्रेष्ठंपीतनिर्मलवाससं॥शंखचक्रगदापद्मधारिणंतंचतुर्भु
जं॥१८॥श्रीवत्सांकंप्रसन्नास्यंकौस्तुभेनविराजितं॥कुंडलकिरीटहारादि
भूषणैरपिभूषितं॥१९॥तंदृष्ट्वापुरुषश्रेष्ठंपद्मयोनिरचिंतयत्॥एषए
वपरोदेवःसर्वस्यजगतःप्रभुः॥२०॥तस्मात्परतरःकश्चिन्नदृश्यतेपुरतः

स्थितान्॥ तमेवसंसयान्प्रष्टुंविधिवानुपचक्रमे॥२१॥ ब्रह्मा॥ कस्त्वमत्य-
॥पद्म० द्भुताकारःपुरुषःपुरुषोत्तम॥ मह्यंनिद्राभिभूताय आत्मानंदर्शयन्मुदः॥२२
॥१०॥ श्रीभगवानुवाच॥ अहंसर्वलोकानांपुराणंपुरुषोत्तमं॥ अनादिमत्य-
निधनंविद्धिमामचलध्रुवं॥२३॥ कारणंसर्वलोकस्यमात्रभूतंपरांतव॥ सं
शयस्यतदीयस्यछेत्तारंमामुपस्थितं॥२४॥ ब्रह्मा॥ यतोस्म्यनुगृहीतोस्मिपू
र्णकामोस्मिशाश्वत॥ अज्ञानंनास्तिनष्टंयंकर्तव्यंनास्तिवाकृतं॥२५॥ नान
वाप्तमवाप्तव्यंमेपिलोकेषुविद्यते॥ कस्यहेतोर्जगत्सृष्टंभवान्मेयतवद॥
२६॥ श्रीभगवानुवाच॥ क्रीडार्थमेकएवाहंब्रह्मन्सृष्टिसंहारपालनैः॥ लोका
नामपिसर्वेषांअहंकर्तापिहेतुना॥२७॥ इतिपंचरात्रेमहोपनिषदिपाद्म
तंत्रेज्ञानपादेब्रह्मादिसृष्टिप्रकारोनामप्रथमोध्यायः॥१॥ ब्रह्मा॥ विधत्स
केनरूपेणकेनरूपेनपासिवा॥ संहरिष्यसिकेनत्वंप्रभोमेविजृंभते॥ श्री ॥राम॥
भगवानुवाच॥ अनंताःशक्तयःसन्तिमनसैवचतुर्मुख॥ चतस्रस्तासुशक्तिनि ॥१०॥

दिशामुख्याविद्याविमूर्तयः ॥२॥ रजःसत्त्वतमोमध्यस्थितःसंसारगोचरः
आनंदाख्यास्तुर्यास्तुभुक्तिमुक्तिप्रदायिनी ॥३॥ रजोगुणेनभुवनंसृजामि
सचराचरं ॥ पालयामिचसत्त्वेनतमसासंहरामिच ॥४॥ आनंदात्मानमा-
ख्यायवासुदेवाह्वयस्वयं ॥ विचारयामिसंसारार्थेमामेवभजंतितान् ॥५॥
सृजामिपामिहन्म्यनंतरूपेब्रह्मादिभिस्त्रिभिः ॥ वासुदेवात्मरूपेणपरेणभ-
वसागरात् ॥६॥ विपाटयामिनिष्कामान्मामाराधयंतितान् ॥ मुख्यःस्व
तुर्णोमतयामुच्यतेपरमःपुमान् ॥७॥ अपवर्गकरत्वेनवासुदेवःसुरेरितः
ब्रह्मादयस्तथान्येतुसंसाराहितदृष्टयः ॥८॥ ब्रह्मा ॥ संसारीपुरुषःकोस्य
मात्रकश्चापरापरः ॥ मुक्तःकोयस्यमात्रहेतुर्विधेनपरापरः ॥९॥ श्रीभगवा
नुवाच ॥ पुण्यपापनिमित्तयःसुखदुःखनिषेवितः ॥ संसारीसापरामात्रा
ब्रह्मभूयमदोयतः ॥१०॥ सात्वापराभवत्तस्यस्वाचरत्वमसत्त्वमं ॥ संसारवा
सनातीतंविमुक्तंकर्मबंधनैः ॥११॥ आत्मत्वसमुदासीनंमुक्तमाहुर्मनीषि

णः॥ सदैकरूपरूपस्य मात्राकापि न विद्यते॥१२॥ ब्रह्मा॥ कस्संसारं प्रपद्य
॥पद्म० ते कश्च गच्छति निर्वृतिं॥ कौतूहलं हि भगवन् ब्रूहि तत्त्वं यथातथं॥१३॥ श्रीभ
॥११॥ गवानुवाच॥ फलं यामनयाकर्म विहितं वैदिकं भजन्॥ वर्त्तते निस्पृहः क
र्म भजमानो न बध्यते॥१४॥ ज्ञानं वै पार्थिकं यस्य वस्तुगाहि निबंधनं॥ बध्य
ते स परं देवं यस्य ज्ञानं समुच्यते॥१५॥ पद्म उवाच॥ मुक्तात्मनश्च भगवन्ना
नंदः कः पुरुषोत्तम॥ एतदाचक्ष्व भगवन् अनुग्रह्यं यदि मे प्रभो॥१६॥ श्री
भगवानुवाच॥ अहमेव भवंत्येते न भेदस्तत्र कश्चन॥ यथाहं विहराम्येवं त
था मुक्तात्मसंहितः॥१७॥ ब्रह्मा॥ बध्यंति पुरुषाः केन हेतवः कर्महेतवः॥
कर्मपाशैर्निगच्छति नान पुरुषाश्चामयंति य॥१८॥ श्रीभगवानुवाच॥ त्रि
भिरेव गुणैर्वस्त्रैः समस्तैः पूर्वसंस्रितैः॥ सत्वादिभिः क्रियाचापि त्रिविधा
संभवंति ते॥१९॥ तयासंसारमृच्छंति पुरुषा मूढचेतसः॥ एवमेव सुरश्रेष्ठ ॥राम॥
यत्नात्तं परिपृच्छसि॥२०॥ ब्रह्मा॥ भिर्गुणैर्योगः पुरुषस्योपजायते॥ क ॥११॥

र्मपाशैर्विमुच्यते मोक्षमाणश्च पूरुषः ॥२१॥ श्रीभगवानुवाच ॥ पुरुषस्य
गुणा एते देहधर्मानुवर्तिनः ॥ विषयस्य वधादेशा भवंति न भवंति च ॥२२॥
ब्रह्मा ॥ कोऽसौ विषयरूपस्तु कः पुरुषाणां महेश्वरः ॥ यस्य योगाद्भवंत्येते न भ
वंति च ते गुणाः ॥२३॥ श्रीभगवानुवाच ॥ त्रिगुणा प्रकृतिर्ब्रह्मन् विषया देहि
नस्तनः ॥ तद्योगाद्बध्यते जंतुस्तद्वियोगाद्विमुच्यते ॥२४॥ ज्ञानातिपुरुषानि
संभवांति त्रिगुणात्मिका ॥ सा च प्रसूते सततं निद्रामस्य पृथग्विधां ॥२५॥ स्व
रूपं विस्मरंत्येष निद्रयाविवशः स्वयं ॥ स बंधं चरत्य ते पुंसां किं भूयः श्रोतुमिच्छसि
२६॥ इति श्रीपंचरात्रे महोपनिषदि पारमेश्वरे ज्ञानपादे चतुर्थोऽध्यायः ॥४॥
प्रकृत्यास्तस्य संयोगो जायते केन हेतुना ॥ एतदाचक्ष्व भगवन् रहस्यं दुर्लभं म
ते ॥१॥ श्रीभगवानुवाच ॥ पश्यापाकरणं ब्रह्मन् अनादिरविनाशिनी ॥ यु
नक्ति पुरुषं सैषा प्रकृत्या गुणरूपया ॥२॥ मत्प्रसादं विना तस्या नाविगमोऽ
स्ति कर्हिचित ॥ यावत्त्वाहं प्रसीदामि तावन्मायादुरत्यया ॥३॥ ब्रह्मा ॥ पूर्ण

कामस्यदेवस्यप्रसादोकिंनिबंधनं॥ततानेकारणंतस्यतन्मेब्रूहिनिबंधनं-
॥पद्म० ॥५॥ श्रीभगवानुवाच॥वर्णानामाश्रमाणांचमर्यादायामपारुला॥ता-
॥१२॥ येसमनुवर्तंतेप्रसादस्तुमेमहान॥६॥तस्मात्संसारिणांपुंसांमत्प्रसादोवि
नाकोचित॥निश्रेयसकरंतान्यंतत्तुश्रेयस्कमलामन॥७॥ब्रह्मा॥भगवन
देवदेवराजानामिपुरुषोत्तमं॥तामेवजगतांमन्यस्त्रष्टारंकमलेक्षण॥७
प्रभवंतियतोलोकाःप्रलयंयांतियत्रच॥भगवंस्तद्दशेषेणज्ञातुमिच्छामि
तांसम॥८॥श्रीभगवानुवाच॥प्रकृतिःपुरुषश्चाभममरूपद्वयं॥अ
नुभविस्यद्धिनियंसोभवाम्यहमिच्छया॥९॥प्रकृतिस्त्रिगुणाज्ञानलादि
र्शनवासिनी॥पुरुषाधिष्ठितासूतेचराणिचराणिच॥१०॥गुणसाम्या
त्ततस्तस्मात्पुरुषाधिष्ठितापुनः॥अजायततमहःतत्वंत्रिविधंत्रिविधैर्गुणैः
११॥अहंकारस्ततोजातस्तस्यनिश्रोविपास्मृताः॥वैकारिकस्तैजसश्चभूत ॥राम॥
दिश्चेतितत्रिधा॥१२॥वैकारिकादहंकाराद्यासात्कार्यंचजज्ञिरे॥ज्ञाने ॥१२॥

ंद्रियाणिपंचैवराजसानैजसात्मनः॥१३॥कर्मेंद्रियाणिजातानिभूतादेस्ता
मसादथ॥शब्दतन्मात्रमभवत्ताकाशमजीजनत्॥१४॥स्पर्शमात्रंतथाक
शात्तस्माद्वायुरजायत॥रूपमात्रंततोवायोस्तस्मादग्निरजायत॥१५॥रस
मात्रमजन्यग्नेस्तस्मादापःप्रजज्ञिरे॥गंधमात्रंततोद्भ्योपिगंधमात्रात्ततोमही
॥१६॥शब्दैकगुणमाकाशंशब्दस्पर्शगुणोनिलः॥शब्दस्पर्शौतथारूपंतद्व
ह्निरुदाहृतः॥१७॥शब्दस्पर्शौरूपरसौचातुर्गुण्यमपांस्मृतं॥शब्दस्पर्शौरूपर
सगंधाःपंचगुणामही॥१८॥नानावीर्याःपृथग्भूतास्ततस्तेसंहतिंविना॥
नाशक्नुवन्प्रजाःस्रष्टुंततस्तेसंहतास्स्वयं॥१९॥महदादिविशेषांताःप्रधानपु
रुषाश्रिताः॥अंडंसमाश्रितंसम्यक्पद्मनाभस्यपद्मज॥२०॥नाभेरजीजनत्त
स्माजगद्योनिरभूद्भवान्॥सर्गादौप्रकृतेरेवमुद्भूतमखिलंजगत्॥२१॥ली
यतेप्रकृतावेवकल्पांतेकमलासन॥ब्रह्मा॥मन्येत्वयाजगत्सृष्टंविधृतंत्व
याविभो॥कालरूपस्त्वमेवैकःकल्पांतसंहृदर्थंच॥२२॥इदानींवदमेज्ञा

नंब्रह्मासिशिवदमच्युत॥यत्ज्ञात्वानपुनर्जन्मकारणंभवबंधनं॥२५॥श्रीभ
॥पद्मं॥ गवान्॥ज्ञानंद्विविधमाख्यातंसत्ताख्यंचक्रियात्मकं॥सत्ताख्यस्यक्रियाख्यो
॥१३॥ नाभिश्चाव्यभिचारिणी॥२६॥ब्रह्मा॥ज्ञानंक्रियात्मकंतावत्वदकीदृग्विधं
प्रभो॥येनाप्यसत्तंसत्ताख्यंयथास्यामिवब्रह्मासिशिवदं॥२६॥श्रीभगवानुवाच
यमश्चनियमश्चैवक्रियाख्याद्विविधास्मृता॥ताभ्यांज्ञानंचसत्ताख्यंप्राप्य
सेवनसंशयः॥२७॥ब्रह्मन्नभिन्नसत्ताख्यज्ञानाज्ज्ञेयमवाप्यते॥ज्ञेयान्मुक्तः
परानंदंपरंधामनिपद्यते॥२८॥ब्रह्मा॥ब्रह्मप्राप्त्यैवयासम्यगुपायःकथि
तःपरः॥इदानींदेवदेवेशब्रूहिमेब्रह्मलक्षणं॥२९॥श्रीभगवानुवाच॥आ
नंदलक्षणंब्रह्मअनादिरूपमाप्रियं॥दोषादिभिरसंस्पृष्टंनिष्क्रियंनिर्वि
कल्पकं॥३०॥अद्वैतमनवच्छिन्नंस्वयंवेद्यंनिरंजनं॥सूक्ष्मंसूक्ष्मतरंस्वैरंस्वयं
ज्योतिर्निरामयं॥३१॥अनंतमक्षयंशांतंमदृष्टांतमवर्णयत्॥ध्रुवमेकंचि ॥राम॥
दानंदंचिद्रूपंसर्वगंपरं॥३२॥गतागतविनिर्मुक्तंवाच्यदेवाह्वयंविभुं॥अ १३

भवंसर्वभूतानांईश्वरंपुरुषोत्तमं॥२३॥स्वभावनिर्मलंनित्यंनिस्तरंगंनि-
राकुलं॥निर्मर्यादंगुणातीतंसगुणंसर्वकामदं॥२४॥हीनवर्णैरसंसेव्यंमो
क्ष्यमाणैरतर्कितं॥अध्येयंध्येयमाद्यंतैरवाङ्मनसगोचरं॥२५॥षाड्गुण्यवि
ग्रहंसर्वशक्तिस्वाश्रयमाश्रितं॥भूतराभूतकृद्भूतंतमसःपरतःस्थितं॥२६॥
प्रधानंप्रकृतेरन्यत्भाग्यंभोक्तृनिरंकुशं॥प्रमाणप्रत्ययातीतंसर्वतोक्षि
शिरोमुखं॥२७॥सर्वतःपाणिचरणंसर्वमावृत्यतिष्ठति॥वहिरंतःस्थितस्या
पिसर्वतःश्रुतिशालिनं॥२८॥अतमोकारमव्यक्तंमूर्तमंत्रात्मकंशिवं
मायारूपममायांहिनित्यनतमणोरणु॥२९॥महतोपिमहत्स्थूलममूर्तम
दृशीमतः॥अमूर्तमूर्तमोजस्वीचिद्घनंनिरुपद्रवं॥३०॥परशांनित्यंपरं
ब्रह्मपरेणज्ञानचक्षुषा॥योगयुक्तःसदामर्त्यःपश्यतिचपरंपदं॥३१
इतिश्रीपंचरात्रेमहोपनिषदिपाद्मतंत्रेज्ञानपादेब्रह्मलक्षणंनामपंच
मोध्यायः॥५॥ब्रह्मा॥सर्वतःपाणिपादादिब्रह्मणोरूपमीरितं॥अरू-

॥ पद्मं० ॥ ॥१४॥

पृत्यापितस्तत्सर्वं कथयस्व यथातथं ॥१॥ श्रीभगवानुवाच ॥ न्वयन्वरमि
दं रूपमासिद्धं परमात्मना ॥ यतस्तत्सर्वप्राणिनां तस्य लक्षणमुच्यते ॥-
॥२॥ देशकालादिनिर्देशेण संयुक्तं परमेष्ठिना ॥ योगपथ्येन सततं सर्वतः अ
कृश मुच्यतः ॥३॥ नियंगूढम यस्मात्सर्गं ताभास यतेजगत् ॥ रवियंथात
थाकुत्वानिरवतस्य स्तरूच्यतः ॥४॥ सर्वं पुरस्थितं तस्य वस्तु जातं यतस्थि
तः ॥ चिरवतामुखतातस्य ब्रह्मणः कमलासन ॥५॥ ज्ञानेंद्रियाणि सर्वा-
णि मय्यंतेश्रिय यडच्चमं ॥ तथा ज्ञानाश्रयत्नत्रयः सर्वेशरामभुः ॥६॥ वि-
दूरमविदूरस्थं तथाव्यवहितं तर ॥ तरणानिराकुसंघातं तेनासौ सर्वतश्चवाः
॥७॥ भिंनावृत्तिरयः पिंडादाभिन्नरवहृश्यते ॥ न हृक्षन्कारपृथकूमूला ऽ
व्यक्तमा वृत्यानिष्ठति ॥८॥ आदर्शे निर्मलेयद्वदंतस्थाप्रतिमायथा ॥ द्रष्
तेनतत्र तद्स्थाद्विभागव्यक्तरूपता ॥९॥ नेंद्रियार्थातिविज्ञाना रूपादिषु-
त्वतुर्मेरव ॥ भगवानमुताहृताः सर्वज्ञः कथितो बुधैः ॥१०॥ परमेषमह ॥राम॥ १४

लनसंयोगात्परमात्मनः॥ व्यापित्वमुच्यतेविद्वद्भिरस्यमहर्षिभिः॥११
अनादित्वमजत्वंनतथैवानंतताविभोः॥ परात्मत्वनमेवैषांप्रत्यक्षादिरुच्य
तेतुभिः॥१२॥ स्वर्णानिर्हिपर्यंतमगंयथुष्पादिकंयथा॥ त्रिभिर्गुणैरव-
स्थापिवसवन्नयुनिर्गनि॥१३॥ यथापुष्करवर्णेषुस्वच्छमंभः प्रतिष्ठितं॥ सं
तवैहिरापिव्याप्यतिष्ठत्यकायुगारणैव॥१४॥ निमग्नस्यवकुंभस्यबाह्यरंत
रयोःस्थितिः॥ परस्यतज्ञयोरैक्यमात्मनाश्रुतिनोदितं॥१५॥ तत्रज्ञज्ञास्यु
बाहुल्यंदेहभेदात्प्रतीयते॥ एकस्यबाह्यविंवस्यदर्पणेषुयथाभिदा॥१६
भूतादिपंचसंघातंसत्रेतव्यवस्थितः॥ जीवोयथावद्विंदुःप्राज्ञासचज्ञप
रसंहितं॥१७॥ अनुधिवाधामस्यदंयकल्याप्यागविष्टनं॥ परात्परतरंवि
सुंसूर्यतोज्ञानचक्षुषा॥१८॥ विदेतिदशिकास्वसाज्ञानगोचरमक्षरं॥ प
रस्यव्यापिनादेहत्वतत्वाख्यानविभ्रमः॥१९॥ यथाघटस्थमाकाशंनीयं-
मानेघटेयथा॥ चातोनिवस्तुतोनैवभेदोस्तिपरजीवयोः॥२०॥ पञ्चप

॥ पंच० त्रसहस्रेषु सूर्येषु भिन्नेषु चक्रमात् ॥ सूक्ष्मत्वात्कालभेदस्य त्रिधानैवोपल
॥ १५ ॥ भ्यते ॥ २१ ॥ तथैव परमात्मायं विज्ञानात्मादिकोविदैः ॥ दूरस्थमज्ञाः पश्यंति
हृत्स्थमेव विदुर्बुधाः ॥ २२ ॥ वितत्य वायुराकाशं यथैकस्तिष्ठति प्रभुः ॥ तथा
चराचरं विश्वं व्याप्यात तिष्ठत्यजस्स्वयं ॥ २३ ॥ सृष्टुं संहर्तुमीशानो नाशमानमुद्दि
लारविः ॥ यथा तथा जगत्सर्वं सृष्टुं हर्तुं प्रभुर्हरिः ॥ २४ ॥ स्वं परं चापि विषयं
प्रकाशयति चिद्घनः ॥ यथा प्रदीपस्स्वस्यापि घटादेश्च प्रकाशकृत् ॥ २५ ॥
वर्णैः सितादिभिर्हीनस्तद्वत्तस्यात्मनो हरिः ॥ षड्भिर्गुणैर्गलितत्वात् ज्ञाना
दिभिरनन्यगैः ॥ २६ ॥ भगवान्कथितः सद्भिः परमात्मा जगन्मयः ॥ इंद्रियम
पिंडितं तत्त्वं माधुर्यं च गुडादिषु ॥ २७ ॥ अभिन्नं तत्त्वताद्रूप्याद्भूतैलवच्च तत्
स्थितं ॥ उपलंभनसामित्वाद्दृश्यते न तदीक्षते ॥ २८ ॥ अजोऽप्यमूर्तिः सर्वेषामं
तरात्मा परः पुमान् ॥ ज्ञानी तां भावनायोगादुपलब्धिपथं गतः ॥ २९ ॥ च
राचरेषु सर्वेषु यद्वस्तु व्याप्य विष्ठितं ॥ ब्रह्म ॥ अमूर्तमरूपमूर्तं स्वसंवेद्यं ॥ राम ॥

वदेतिच ॥ विधयाभगवन्मह्यं तानान्वस्ययथातथं ॥२०॥ श्रीभगवानुवाच
पंचपंचात्कमार्गेणपरीक्षांचक्रमंडल ॥ कृत्वासमन्वेनोंनिबोधाहिषट्कासर-
विध्यया ॥२१॥ मायायर्योनियालोन्कोविभिनोदर्शकोत्तमाः ॥ तेषांहृदंभुज
मासाल्कृतंकीदृक् ॥ दार्विरम्तिपरःपुमान् ॥२२॥ नरोनोविष्णुमायांतनवर
तीनरजनाः ॥ ब्रह्मा ॥ वस्तुसाक्षात्कृतंकीदृक्लक्षणंतस्यकीदृकं ॥ भगवन्
कथ्यतांसर्वेमयिचेनस्त्यनुग्रहः ॥२४॥ श्रीभगवानुवाच ॥ वाल्याग्रशतभा
गकंम्प्रथानपुरुषात्मकं ॥ गमनागमनेहीनंमाणिक्यंतदृगोचरं ॥२५॥ म
हिष्ठंचहृतावस्तुपरमानंदविग्रहं ॥ विभिन्नयोनिनिर्मुक्तंसर्वेगंभावनात्म
कं ॥२६॥ तद्रूपंप्रणवाव्येयंमनकंप्रणवान्वितं ॥ एवंरूपपरंदेवंहृदययो
गिनःसदा ॥२७॥ स्थूलंसूक्ष्मंपरंतस्यत्रिविधंरूपमीरितं ॥ स्थूलंतत्सकलं
ज्ञेयंसूक्ष्मंसकलनिष्कलं ॥२८॥ परंनिष्कलमेवास्यरूपंकमलसंभव ॥ रू
पंसहस्रशीर्षादिसकलंपरमात्मनः ॥२९॥ तेजःपुंजंसपारादिरूपंसक

॥पद्मं लंनिष्कलं॥सच्चिदानंदरूपादिरूपंनिष्कलसंज्ञितं॥५०॥प्रकृतिर्विकृ-
॥१५ तिस्मोभद्ररूपपरमात्मनः॥सत्वादीगुणसंघातःप्रकृतिर्विकृतिःपुनः॥
५१॥पुरुषस्त्रिगुणात्मव्यक्तस्तनयस्त्रिगुणात्मिका॥अधिष्ठिताजगत्सर्वं
प्रसूतेचेतनात्मिका॥५२॥संहरंत्यपितत्सर्वंनिधायेदेवतस्यसा॥एकए
वपरोदेवोनानाशक्तिसमन्वितः॥५३॥करोतिसर्वसंहारंसचनारायणः
स्मृतः॥नानाद्वारादिभिःपुरद्वारैःयथापुरनिवासिनः॥५४॥अंतर्विशंतितद्व
त्पुरुषाःपुरुषंपरं॥उपासकाविशंत्यंतर्विष्णुस्थापरयामहा॥५५॥ज्यो-
तिर्मंडलमध्यस्थंरुक्माभंपुरुषंपरं॥हृत्पद्मकर्णिकारूढंशंखचक्रगदाध-
रं॥५६॥चतुर्भुजंभावयेत्तद्ध्यानध्यंतपुयोगिनः॥ब्रह्मरंध्रभुजामध्येनाभि
चक्रेगलावरे॥५७॥जिह्वाग्रेतालुमध्येचभावयेत्तायतेंद्रियाः॥पूर्वजन्म
कृतंकर्मदग्ध्वायांतिसनातनं॥५८॥विष्णवाराधनपराःपंचकालपराय- ॥राम॥
णाः॥अष्टांगयोगमार्गेषुशास्त्रद्वादशाक्षरचिंतकाः॥५९॥वासुदेवाश्रया १५

सर्वो वासुदेवः परायणः ॥ सर्वपापविशुद्धात्मा याति ब्रह्म सनातनं ॥ ५० ॥
नद्यो यथा पृथग्भूताः पतंत्यो जलधेरिव ॥ भूत्वैक्यं च यथा यांति तद्वद्ब्र-
ह्मणि योगिनः ॥ ५१ ॥ महानदीनां बहुधा रसरूपादिभेदवत् ॥ अविशिष्टं वा-
रिधेर्वारि नादकाश्च तिरिच्यते ॥ ५२ ॥ तथैव ब्रह्मणि परे मुक्तात्मानश्च नुसु-
ख ॥ एकभावं गता दृष्टं तत्सालोक्यादि वा भवेत् ॥ ५३ ॥ एतद्रहस्यमुदितं
निषद्सूपनिषत्सु च ॥ कृत्स्नं प्रकाशितं तुभ्यं मया कमलसंभव ॥ ५४ ॥ इति
श्रीपंचरात्रमहोपनिषदि पाद्मतंत्रे ज्ञानपादे ब्रह्मप्राप्त्युपायकथनं ना-
म षष्ठोऽध्यायः ॥ ६ ॥ ब्रह्मा ॥ ब्रह्मणः प्राप्त्युपायस्य ज्ञानस्योत्पत्तिकारणं
उच्यतां तद्यथापूर्णं प्रसादो मयि चेत्तव ॥ १ ॥ श्रीभगवानुवाच ॥ वाश्चाप-
रागरहितं निर्मलं तस्य जायते ॥ विज्ञानं यस्य भगवत्समाराधनकर्मभिः
॥ २ ॥ मनाद्यविद्याविलयो योगांगैश्च यमादिभिः ॥ शौचमिज्या तपश्च-
र्या स्वाध्यायाभ्यसनं तथा ॥ ३ ॥ ब्रह्मचर्यं मिताहारो मौनमिंद्रियनिग्रहः

अहिंसाचोपवासश्चस्नानतीर्थनिषेवणं॥४॥वैराग्यंपुत्रदारेषुदुःखाहा-
॥धर्मं रविसर्जनं॥अक्रूरत्वात्सत्संगासभामेत्रूरमेत॥५॥परदारेषुवस्तुषुवैमु
॥१७॥ ख्यंशास्त्रसेवनं॥असत्कृताभोजनादौवर्तमानचित्तप्रसादनं॥६॥ज्ञानंप्रत्य-
ड्मुखंजातंतेनजातानिलस्पदं॥यच्चाप्यनंनिवर्त्तंतेजन्ममृत्युविवर्जिताः॥
७॥पुरुषाकथिताहेतुशिलिविज्ञानजन्मनि॥संसारहेतुमधुनाकथयामि
त्वनुमुत्र॥८॥शुभाशुभात्मकंकर्मंस्थूलामायाविदांगताः॥भोगायतनमा
स्थायत्तत्कर्मंप्रभावजं॥९॥दुःखंसुखंवापुरुषःभुंक्तेहेतुर्यत्रिताः॥
संसृतिःसात्वनुबंधनस्याकर्मेवकारणं॥१०॥मुक्तिज्ञानाधिकेतस्यासंघ
तेरात्मनोभवेत्॥कर्माणिचक्षयपुनःसैवजायतेनिरवग्रहा॥११॥संसार-
हेतुभूतंचकर्मज्ञानेननश्यति॥क्षीणकर्मणिसंसारहेतौमुक्तिरनंतरा॥
॥१२॥कल्पितसंसृतिःकर्महेतुरुक्ताविनिश्चिता॥करोतिकर्मचाविद्या ॥राम॥
विवशःपुरुषस्स्वयं॥१३॥गुणास्त्रयोविद्यासमासद्यासदन्वयः॥तेर १७

वकुरुतेकर्मैरुभंवार्यादिवारुभं॥१४॥तैस्त्रिभिस्त्रिविधानिदानायतेक-
र्मकारणं॥मैत्र्यादिध्यानमायान्तकथ्यतेकारिरात्तमेः॥१५॥सत्वाख्यस्तमयो
निद्रारजसःकर्मसंकुला॥तमसामोहिनीनामतामिर्निर्गतिनःपुमान्॥१६
संसरत्यवशःकर्मकरोतिजनकारणं॥सत्वादिगुणसंयुक्तंमनोभूतपुरस्त-
रः॥१७॥अश्वत्थंपंचधाभिन्नंअमूलबहुधाक्रियाः॥मनःसत्वगुणोपेतंपृथि
वीलयथाभवेत॥१८॥तदाकरोतिपृथिवींखननादिक्रियांनरः॥आरोपय
अतिश्वार्थोपालनंवानृणांतथा॥१९॥रजसिस्थप्राणहिंसांमृगयाद्युपिसे
वेन्च॥तमसिस्थतुद्रुरथच्छेदनंभेदनंतथा॥२०॥आभिचारवशीकारपर-
स्वहरणादिकं॥सत्वस्थस्तजलक्रीडांजलपानंचतुर्मुखं॥२१॥नदीतरणमि
त्यादिकरोतिविविधःपुमान्॥रजसिस्थजलक्षोभ्याअवगाहादिमज्जनं॥
२२॥सेतुबंधंसमुद्रादौबाहुभ्यांतरणंयथा॥तमसिस्थमनस्यप्स्वजलतीर
विमोचनं॥२३॥कूपवापस्वननंरत्नकरोतिपुरुषःसदा॥अन्योन्यंवोसम-

॥पद्मं
॥१८॥

लश्चेन्द्रसूर्यादिदर्शनं॥२४॥पद्मलमुष्णताभावंच रत्नहेमादिदर्शनं॥क
रोतिरजसिमाधेखड्गहस्तसमुत्थितः॥२५॥मृगान्हंतितदामुष्टिदंडैश्चभृश
ताडनं॥तमसिस्थेमनस्यैतोस्कपुष्यादिषुस्वदा॥२६॥खस्थनस्थेगुणेसत्वे
शोअयानंचनर्तनं॥गानंप्रलापनंकर्मकरोतिरजसिस्थिते॥२७॥चित्तगर्जा
खराद्यादिलघोव्येंगमनादिकं॥तमोगुणस्थेमनसिभाषादारोहणादिकं॥
॥२८॥सत्वेव्योमनिनिश्चिस्थेनिराभासंनिराश्रयं॥गमनंरानसेचित्तेदृष्टंजा
ग्रतियत्पुनः॥२९॥स्वापनदीस्तनसर्वंमनस्तमसिसंस्थिते॥सर्वेदृष्टंयदात्मा
नंस्वरवदुःखेनबुध्यते॥३०॥एवंबहुविधंकर्मपुमान्मायावशारुद्रः॥करोति
त्रिगुणैर्युक्तःकर्मभिस्तैपुमानयं॥३१॥संसारपतिताजन्मनाशांश्चभ्राति प-
श्यते॥यदामत्सारसुमुखःपरमात्मासनातनः॥३२॥तदामायाविनिर्मुक्तोयो
गयुक्तोजितेन्द्रियः॥विज्ञानेनपरंब्रह्ममाप्नोतिस्वखलक्षणं॥३३॥ब्रह्मा॥ए ॥राम॥
भिर्गुणैःकथंयोगोवियोगोवाभवेत्कदा॥श्रीभगवानुवाच॥पुरुषस्यगुणा १८

येतेत्रयोपिकमलासन।।मायायोगवियोगाभ्यांभवंतिचनभवंतिच।।३५
मायानपायिनीनित्यंमय्यितिष्ठतियादृशी।।मायावशंगताःसर्वेभ्रमंत्यज्ञा
नमोहिताः।।३६।।ब्रह्माद्यापिकिमुतदेवाद्याःकमलासन।।प्रसादादेवसा
मायामदधीनाविनश्यति।।३७।।मायायोगेनबध्यंतेमुच्यंतेतांतरंतिये।।
ब्रह्मा।।परिपूर्णस्यभगवन्प्रसादस्तवकिंकृतः।।नविघ्नकारणंतत्रतन्मेब्रू
हियथातथं।।३८।।श्रीभगवानुवाच।।श्रद्धाभक्तिसमाधिभ्यांमयिसम्यकृ
समर्पितः।।कारणंशास्त्रदृष्टेनविधिनानान्यथाभवेत्।।३९।।सर्वेषांमोक्ष
माणानांकारणंत्रयमीरितं।।तैर्विनासंसरंत्यस्यमायापरवशाजनाः।।४०
ममावताररूपाणिवुद्धास्थानिमन्मुखात्।।अधर्मस्यापरांसर्थंधर्मका
मप्रचस्यये।।४१।।वहूनिवाध्युंयोगानित्रयंतत्रसमाचरेत्।।सर्वाकारविनि
र्मुक्तंरूपंयत्परमात्मनः।।४२।।दुर्विज्ञानंतदन्येषांब्रह्मादीनामगोचरं।।मु
क्तिकारणमित्युक्तंब्रह्मन्भूयःकिमिच्छसे।।४३।।ब्रह्मा।।अचेतनंचेतनंच

॥पद्म० ॥१९॥

रूपं सृष्टं समीक्ष्यते ॥ किमेकया निसा सृष्टिर्या निर्भेदः किमद्वयाः ॥५४॥ श्री
भगवानुवाच ॥ अभिन्नमेकमव्यक्तं रूपं तत्परमात्मनः ॥ अविभक्तं विभक्तं च
द्विनिमर्पिरिवाहितं ॥५५॥ अव्यक्तं व्यक्तिमापन्नं कदाचित्पुरुषेच्छया ॥ महत्
जातः स्ततोऽव्यक्ताद्दहंकारस्ततोऽजनि ॥५६॥ तन्मात्रापंचकं जातं अहंकारात्म
नस्ततः ॥ इंद्रियाणि दशैकं च समजायत पद्मज ॥५७॥ महाभूतं पृथिव्यादि पंच
कं तदनंतरं ॥ अचेतनाच्चेतनाश्च सृष्टिरेवमुदाहृता ॥५८॥ त्रिभिरेव गुणैरेतैरु
त्तमाधममध्यमाः ॥ जायंते कारणं वत्सा तान्प्रवीमि क्रमादहं ॥५९॥ भावपुत्र पु
र्भूयिष्ठं सत्वं श्रेयोऽमुमुक्षव ॥ भूयिष्ठराजसा मध्या जगत्यस्तमसाधिकः ॥६०॥
तत्र सत्वादिकैर्भावैरेवं नाममताः पणी ॥ भोगो वाप्यपवर्गो वा फलं तेषां यत
स्मितं ॥६१॥ रजसाधिकभावेन यजंते ये द्विजातयः ॥ तेषां त्रिविष्टपे वासः
पुनरावृत्तिलक्षणः ॥६२॥ संसृतिश्च भयेन स्य यजंते येन माधिकः ॥ तेषां भु
वस्तलेवासः क्षयं भूर्लोकसंसृतिः ॥६३॥ यस्तु भूतपिशाचादि यजते तमसा

॥राम॥ ॥१९॥

धिकेः॥दुःखितानरकेघोरेजन्मस्थावरजंगमादिषु॥५४॥गत्वागत्वानिवर्तंतेय
द्धर्मपरायणाः॥अद्यापिननिवर्तंतेयेममाराधनेस्थिताः॥५५॥आब्रह्मस
दनाल्लोकाज्जायंतेवैगवस्थिताः॥मल्लोकवासिनोभूयःसंसरंतिनकुत्रचित्
५६॥तस्माद्भजस्वमांब्रह्मन्सत्वभावस्थितःसदा॥सत्वादिगुणयुक्तानांआहा
रस्त्रिविधस्मृताः॥५७॥स्निग्धाश्चमधुराहृद्यास्थिरास्तुःप्रथमेगुणे॥कट्वाम्ल
लवणप्रायामध्यमेतिष्ठतांप्रियाः॥५८॥रसहीनंयातयामंपूतिगंधंत्विरोप
तं॥उच्छिष्टंप्रीतिजननंजगन्यगुणवर्तिनः॥५९॥सत्वात्सुखमयीनिद्रारजसा
कर्मसंकुला॥निद्रादिवानिशंनित्यंतमोयस्याधिकोगुणः॥६०॥सत्वस्थस्यो
र्ध्वगमनंस्थितिर्मध्येरजोधिके॥अतोगतिस्तामसानांत्रिविधानांत्रिधाग
तिः॥६१॥तत्रसत्वंनिर्मलत्वात्प्रकाशकमनावृतं॥सत्यज्ञानंतपोमौनंधृ
तिःशौचंशमस्तथा॥६२॥इत्यादयःसत्वनिष्ठगुणाःकल्याणकारणाः॥अ
हंकारस्तथादर्पःक्रोधोडंभस्तथोदराः॥६॥३॥गुणास्तेजोगुणस्यैतेतामसस्य

नुकथ्यते॥पशुन्यंपरनिंदाचनिद्रालस्यंनृशंसता॥५४॥इत्यादयस्तमोधीना
॥संसं०॥ गुणास्तत्काचतुर्मुख॥प्रलीनयोरितरयोर्गुणयोश्चजघन्ययोः॥सत्वेप्रवृद्धे
॥२०॥ विज्ञानमुत्कृष्टंजायतेधिकं॥तेनप्राप्नोतिपरमंस्थानंपरमदुर्लभं॥५५॥यत
प्राप्यननिवर्तंतेसंसारेदुःखसंभवे॥देहंत्यजंतसत्वस्थालोकान्यातिसनातना
न्॥५७॥रजस्थस्यप्रलीनस्यजन्ममात्रेमहाकुले॥भवेयतमसिस्थस्यपुरुष-
स्यचतुर्मुख॥५८॥मूढयोनिषुजन्मस्यानिकृष्टासुपुनःपुनः॥स्यनतोतस्मृति
र्येषुदेहसंबंधमात्मनः॥५९॥भावेषुतेनमन्वेतिपुरुषोभावनावशान्॥पुंसा
मेवंचस्तम्भिघागतयःसमुदाहृताः॥६०॥इतिपञ्चरात्रेमहोपनिषदिपाद्मतं-
त्रेज्ञानपादेगतिविरोधकथनंनामसप्तमोध्यायः॥७॥ब्रह्मा॥विज्ञानोपाय
रूपेणतपश्चर्यायकीर्तिता॥भगवंस्तत्तमःकीदृक्कंकिंवातत्कथ्यतांमम॥श्री
भगवान्॥वाङ्मनःकायजंतेनतपस्त्रिविधंमम॥२॥देवद्विजगुरुप्राज्ञपू ॥यम॥
जनंशौचमार्जवं॥अहिंसनंब्रह्मचर्यंतपःशारीरमीरितं॥अनुग्रहपरंवाक्यं २०

सत्यंभूतोपकारणं॥३॥स्वाध्यायाभ्यासनंचेतिवाचिकंकथितंतपः॥संतोषं
मततंब्रह्मचिंतयात्मविनिग्रहः॥४॥भावशुद्धिःसामवाक्यंतपोमानसमी
रितं॥अश्रद्धानैकृतंसम्यक्फलाकांक्षिभिर्नरैः॥५॥सात्विकंतत्तपोज्ञेयं
तच्चिविज्ञानकारकं॥सत्कारमानपूजादिसिध्यर्थंराजसंत्तपः॥६॥तामसंतु
तपस्तस्याप्यसत्संवादनादिकं॥कर्मनाह्निविधंनैवविज्ञानोत्पत्तिकारणं॥
॥७॥ब्रह्मा॥कृतप्रसूतिर्जगतांतेषांनाशःकसंमतः॥कियंतंकालमेतेषांति
तिर्मेभगवन्वद॥८॥श्रीभगवान्॥आपृच्छाप्रच्छतिर्य्यैकिंसूतेसर्वंचराचरं॥
तत्रैवलीयतेसर्वंब्राह्मेआयुषिचस्तुतिः॥९॥कालोयुगसहस्राख्योदिवाय
श्चतावती॥ब्रह्मणस्तेनमानेनशतमायुश्चवत्सराः॥१०॥भवंतिमनवस्त
स्यदिनेतत्रचतुर्दश॥एकोनसप्ततिःकालोमनोरेकस्यकीर्तितः॥११॥पर
स्मिन्ब्रह्मणवीचीनेलयंगते॥प्रलयोमहदाख्यायंचतुराननकीर्तितः॥१२॥
अवांतराश्चप्रलयादिनादिनमथोजनाः॥भवंतिधातुर्मिस्तेस्तेमहांश्चप्र

॥पद्म०
॥२१॥

क्षयंपुनः॥१३॥चक्रवत्प्रलयःकालोनविरामोस्तिकर्हिचित्॥ब्रह्मा॥किं
रूपाप्रकृतिर्देवभूतेकथमिदंजगत्॥ब्रूहिसर्वमशेषेणभगवन्भूतभाव-
न॥१४॥अन्यूनाधिकरूपाणांसत्वादीनांचतुर्मुख॥गुणानांसंभृतिर्यासा
प्रकृतिःसद्भिरुच्यते॥१५॥अचेतनासाविश्वस्ययोनिरव्याकृतिस्वयं॥नि-
त्यामृतेजगत्सर्वंनियोगात्परमात्मनः॥१६॥अविभक्ताविभक्ताचदृश्यतेस
र्पिरिवस्थिता॥संकर्षणाख्योभगवान्प्रकृतावेवताःप्रजाः॥१७॥रुद्रसंहर
तिस्मैरंब्रह्मणोदिवसक्षये॥दिवसादौजगत्सर्वंपुनरेवासृजत्प्रजाः॥१८॥
लोककर्तास्वयंब्रह्मायथापूर्वंयथाक्रमं॥इत्येवंसर्गसंहारौमयासम्यगुदी
रितौ॥१९॥एतत्सर्वंमष्टगुणवत्किंदर्पद्धिकिमाप्नुयात्॥आप्नोतिकीदृक्
सायुज्यंयुंजानस्यसुमेधसः॥२०॥श्रीभगवानुवाच॥अणिमामहिमाऽ
चापियावदेवास्यकाम्यते॥तावंतमिष्टमाप्नोतिलघिमागरिमापिवा ॥राम॥
२१॥दृश्यमाणमवाप्नोतिलघिमांतेनपुरुषः॥दूरांतिदूरमप्यपक्षणमा ॥२१॥

त्रेणगच्छति॥२३॥यथाशाल्मलितूलस्यतथादेहस्यलाघवं॥गरिमातेनदे
हस्यपर्वतस्येवनोद्युतिः॥२४॥आहारेषुविहारेषुयथाकामंप्रवर्तते॥संक
ल्पेनैवभूतानिपश्यंतिकमलासन॥२५॥परकायप्रवेशांश्चयथेष्टंप्रतिपद्य-
ते॥एभिरष्टभिरेवैतेविहरंतियथेप्सितं॥२६॥यदिमांविस्मरेयुस्तेस्वर्गनि
द्राविमोहिताः॥मद्भक्तिस्मरणादेवप्रतिस्थानेवहाजनाः॥२७॥जायंतेपुन-
रुत्कृष्टवंशेषुमहतांसतां॥पुनर्युंजंतिमामेवयावदिष्टसिद्धिकाम्यया॥२८॥मु-
च्यंतेमत्प्रसादेनजन्मनोस्माद्विगर्हितात्॥भेदेनवाप्यभेदेनमिश्रणेनचतु
र्मुख॥२९॥त्रिदेवमुक्तिरुदिताभेदेकैकयैलक्षणा॥मुक्तियैर्येहलोकेषुप
रिच्चर्यांपराचरा॥३०॥देवस्यतद्देवैवतेवैकुंठपरमात्मनः॥लोकेतस्यस-
मीपस्थामुक्तात्मानःसमाहिताः॥३१॥वसंतिकिंकराःसंतस्तत्प्रसादपरास
दा॥अभेतमुक्तिरत्यंतमेकंस्यात्परजीवयोः॥३२॥आत्मनोभावनाचैक्य
सोहमित्येवभावात्मिका॥समीहितेवसर्वेषांफलानामुत्तमोत्तमं॥३३॥य

स्यैवमेकतावच्छिन्नजीवात्मपरमात्मनोः॥सिद्धांतेमिश्ररूपेतुभेदस्त्वितानै
॥पद्म० नादिभिः॥३४॥तोषयित्वापरंदेवंतत्वायुक्तःसमाहितः॥विज्ञानेनैकतां
॥२२॥ नपरमात्मनिविन्दते॥३५॥एवंसंप्राप्नोतिसामुक्तिरुक्तासायुज्यलक्षणा॥
एतत्त्रयंमणिमाद्यष्टगुणावाप्तिःसुदुर्लभा॥३६॥मुक्तिर्वैपरमानंदप्रा-
प्तिरूपायदीप्सितं॥पुंसांतदुभयंमुक्तिःप्रसूतेपरमात्मनि॥३७॥ब्रह्मा॥-
बहूनितत्वान्युक्तानिशास्त्रेबहुभिरुच्यते॥तेषुतत्वेषुसर्वेषुवाहनाविहि-
ताक्रमात्॥३८॥समाधिरेकतानैवसापिविज्ञानमुत्तमं॥प्रसूतेयेनतत्व-
ब्रह्मतत्वेभ्यःपरमंमतं॥३९॥प्रानुवंतिनराःसर्वेतत्वानिकथयस्वमे॥श्री
भगवानुवाच॥चत्वारिंशद्दशैकंचतत्वानिपरमात्मनः॥रूपाण्यवचतुर्वं-
क्रमंक्षेपात्कथयाम्यहं॥४०॥भावनात्तेषुविज्ञेयासिद्धयाकल्पतेपरा॥-
वक्तव्यानितत्वानिहतास्तान्यवधारय॥४१॥अव्यक्तंबुद्धिरहंकृततःप ॥राम॥
रमहंकृतिः॥तन्मात्रापंचकादेकदशाचाक्षाण्यनुक्रमात्॥४२॥पृथिव्या- ॥२२॥

दीनिभूतानिपंचैवकमलासन॥मायाकालकलारागविद्यानिनियतःक्रमा
त्॥५३॥नंदश्चैवमहानंदोमहाविद्यासमीरिता॥क्षेत्रज्ञश्चशिवोब्रह्मापुरुष
स्तदनंतरं॥५४॥सत्याच्युतोतथानंदोविष्णुःसर्वत्रनिर्वृतिः॥विरिंचिपुरुषश्च
दौपरमेष्ठीसमीरितः॥५५॥नाम्नानिरुद्धप्रद्युम्नसंकर्षणसमाह्वयः॥वासुदे
वश्चमलारिदशान्येवचतुर्मुख॥५६॥ततःप्रोक्तमिदंसर्वंयथोक्तंचेश्वराध्वरं॥त
त्त्वपंचोरूपाणितेषांनामानिकक्षमः॥५७॥नेष्ठेसर्वाण्यशेषाणिवक्तुंवाचा
मपीश्वरः॥दिगेषाकथितानुभ्यंतत्त्वानांनामपद्धतिः॥५८॥संज्ञाविकल्पेनतत्त्वा
निभावयंतसमाधिभिः॥युंजानायोगिनःशश्वत्प्राप्नुवंतिपरंपदं॥५९॥इति
श्रीपंचरात्रेमहोपनिषदिपाद्मेतंत्रेज्ञानपादेतत्त्वविशेषकथनंनामअष्टमो-
ध्यायः॥ब्रह्मा॥अज्ञानसागरंतीर्त्वाविद्यापारमुपेयिवान्॥उच्यतांसांप्रतंमं
स्थंभुवनानिचतुर्दश॥१॥रूपतोमानतश्चापिविज्ञानंपरमेश्वर॥श्रीभग-
वानुवाच॥यत्रप्रतिष्ठतंयत्रमानंरूपंचयादृशं॥भुवनानांतदखिलंचतुर्मु

।।पद्म०
।।२३।।

मुखैशतैः।।४।।वक्तुंनिरवशेषेणकःक्षमेतत्प्रपंचतः।।बोद्धुंवानिखिलंशक्तः
कोवाधारयितुंक्षमः।।२।।तद्ब्रवीमिसमासेनसर्वंसंबोधसंयथा।।चतुरस्राभ
वंतीभूःपंचाशत्कोटियोजनैः।।४।।विस्तीर्णासर्वतोदिक्षुघनंवैकोटियोजनं।।
द्वीपानिसप्तसंसंत्रतावंतस्तोयराशयः।।५।।जंबुद्वीपकवत्सर्वेभूमेरुपरिवि-
स्थिताः।।द्वीपानांनामभिस्तानकथ्यमानंक्रमंशृणु।।६।।जंबूप्लक्षकुशक्रौंचशा
कद्वीपंतथापरं।।शाल्मलीपुष्करंनामसप्तमंचतुरानन।।७।।आनुपूर्व्यात्समु-
द्रांश्चकथयामियथातथं।।लवणेक्षुरसौपश्चात्सुरेयत्तदनंतरं।।८।।सर्पिर्दधि
पयस्तत्ततःस्वादूदकंपरं।।भूभागमध्यमेजंबूद्वीपमानंचकथ्यते।।९।।ल
क्षयोजनविस्तारंसर्वतस्तदनंतरं।।विस्तारंवारिधिस्सारंतावत्प्लक्षद्वीपमनंतरं।।
१०।।उत्तरोत्तरमेकैकंद्विगुणायामविस्तरः।।द्वीपानिषट्समुद्राश्चपरितिष्ठा
श्चतुर्मुख।।११।।द्वीपंजंबूसमाख्यातंविभजेत्तथापुनः।।मागेतुमध्यमेमेरु-
श्चायोलक्षसंमतः।।१२।।योजनानांक्षितेरंतमग्नःषोडशसंख्यया।।सहस्राणां ।।राम।।
।।२३।।

योजनानांशिरोभागःप्रकाशते॥१३॥स्थितऊर्ध्वंसमेरोश्चसर्वतोमूर्ध्निविस्त
रः॥द्वात्रिंशत्सहस्राणांयोजनानामयंपुनः॥१४॥कर्णिकावत्त्वभूपद्ममध्ये
सम्यगवस्थितः॥शृंगैःशतसहस्रेणशतयोजनविस्तृतैः॥१५॥तत्संख्यापरि
णाहेश्चतस्यपार्श्वेमहीधराः॥वक्ष्याम्यानुपूर्व्येणयथावद्वदतःशृणु॥१६॥
हिमवान्हेमकूटश्चनिषधश्चास्यदक्षिणे॥एतेवर्षाचलाःप्रोक्ताश्चयःकमल
संभव॥१७॥वर्षंभारतमाख्यातंप्रथमंतदनंतरं॥नाम्नाकिंपुरुषंतस्यहरिव
र्षमनंतरं॥१८॥उत्तमेमेरुशैलस्यक्रमाद्वर्षेषुभूधराः॥नीलश्वेताह्वयःशृंगी
नाम्नावर्षत्रयंपुनः॥१९॥रम्यंहिरण्मयंवर्षमुत्तराःकुरवस्तथा॥लक्षाणिषट्
वर्षाणिप्रत्येकंपरिमाणतः॥२०॥योजनानांसहस्राणिनववर्षंतुमध्यमं॥इ
लावृतंसमाख्यातंतन्मध्येमेरुरीरितः॥२१॥मेरोश्चतुर्दिशंतत्रविस्तीर्णंयो
जनानिषट्॥त्रीणिचैवसहस्राणिचत्वारस्तत्रपर्वताः॥२२॥विष्कंभरूपैरचि
तायोजनायुतमुच्छ्रितः॥मंदरोदिशिपूर्वस्यांयाम्यायांगंधमादनः॥२३॥प

नीच्यांविपुलोनाम्नाकौबेरीमधितिष्ठति॥दिशाकृपांस्तश्चत्वारोवृक्षाःकेतुव-
॥पद्म० द्रुमताः॥२४॥कदंबमूरुहाजंबूपिप्पलोविटपीवटः॥दानानिहद्यान्येकंचतेषां
॥२५॥ प्रसेकमायतिः॥२५॥जंभालयासमाख्यास्यद्दीपस्यकमलासन॥फलानिगज
मात्रानिपतितानिशिलातले॥२६॥शीर्यंतेयानचातेषांरसवाहासरिद्वराः॥जं
बूनदीतिकथितानद्यांविविनाशिनः॥२७॥पीत्वारसंजरामृत्युवलीपलितव
र्जिता॥नस्वेदोनचदौर्गंध्यनेंद्रियाणामपिक्षयः॥२८॥भवंतितत्पानीरार्कमृद
स्तद्रसरंजिता॥जांबूनदाख्याःकल्यंतेसौवर्णाकल्पसंपदः॥२९॥भद्राश्ववर्षमा
ख्यातंमेरोःप्राच्यांचतुर्मुख॥पश्चिमंकेतुमालाख्यमेतयावर्षयोःपुनः॥३०॥इ
लावृतंसमाख्यातंमध्यमंतसुरादितं॥वनंचैत्ररथंपूर्वेदक्षिणंगंधमादनं॥३१
वैभ्राजंपश्चिमंमेरोर्वनंनंदनमुत्तमं॥अरुणोदंसरःपूर्णंमहाभद्रंततःपरं॥
३२॥संहस्योदंमतीच्यांनंडदीचीनंचमानसं॥देवोपभोगयोग्यानिसरांसिकथि ॥राम॥
तानिते॥३३॥शीतातश्चमुकुंदश्चकुररीमाल्यवानथ॥वैकंकनामापर्यंतेपू ॥२५॥

वैस्यां केसराचलाः ॥३४॥ त्रिकूटो गिरिसंज्ञो भोपचगः कुचलाहूयः ॥ निषधो द-
क्षिणास्तस्य नाचनाकेसराचलाः ॥३५॥ शिखिवासोऽथ वैदूर्यः कपिलो गंधमाद-
नः ॥ जारुधः पश्चिमाश्चन केसराः पंचभूधराः ॥३६॥ शंखकूटः समाख्यातः सम
ख्यातस्तनर्षभः ॥ हंसः समाख्ययानागस्तथा कालांजनप्रभः ॥३७॥ उदीच्यां के-
सराः पंचविंशतिः केसराचलाः ॥ योजनानां सहस्राणां द्वात्रिंशन्मानसंमिते ॥३८
विस्तारो मूर्ध्नि शैलस्य मेरोर्भागे च मध्यमे ॥ चतुर्भिर्दशभिश्चैव सहस्रैर्निर्मि-
ता पुरी ॥३९॥ योजनैः संमिता चातुर्कर्णिकाचाचलां मुने ॥ विदिक्षु दिक्षु चाष्टा
सु परितो ब्रह्मणः पुरी ॥४०॥ इंद्रादिलोकपालानां पुरः पूर्वादिषु स्थिताः ॥ वि
स्तारायाममानेन शतयोजनसंमिताः ॥४१॥ पुरीमवतिमाद्यानीनाम्नाचैवाम
रावती ॥ सहस्रगो पुरद्वारप्राकारपरिखाकुला ॥४२॥ तेजोवती पुराग्नेयी या-
म्यां संयमनी पुरी ॥ रक्षोवती राक्षसी तु शुद्धवत्यथ वारुणी ॥४३॥ वायोर्गंधव
तीख्याताख्याता सौम्या महोदया ॥ यशस्विनी भवस्याक्ता केसराचलभूमिषु

॥पद्म० ४४॥भगवन्मूर्तिभेदानां पुरःसंतिपरिष्कृताः॥ भित्वेंदुर्मंडलंगंगाभगवत्पाद
॥२५॥ जन्मभूः॥४५॥दिवःपतंतिमस्यारामभ्यासंब्रह्मणःपुरः॥चतुर्दिक्षुमवंतीसा
चतुर्धाभवतिस्वयं॥४६॥सीताचालकनंदाचस्रुचक्षुर्भद्रयासह॥चतस्रोना
मभेदाश्चदिग्भेदाश्चचतुर्मुख॥४७॥सीतांतरिक्षगापूर्वंशैलानिक्रम्यनिम्न
गा॥यातिपूर्वेणवर्षेणभद्रस्वेनचसागरं॥४८॥प्रविष्टासरितांमुख्यादक्षिणे
नतथास्वयं॥भारतंवर्षमभ्येतिशैलानसमुत्सान्ततः॥४९॥प्रविष्टालकनंदा
भातिविंचैलोक्यपावनी॥स्रुचक्षुःपश्चिमाद्वैलात्केतुमालाह्वयंपुनः॥५०॥
अतीत्यवर्षंसंभोधिमायातिपश्चिमापतिं॥भद्रागिरेउदीचीनांदत्त्वानुत्तरान्
कुरून्॥५१॥अतीत्यवारिधिंयातिनिम्नगासरितांपतिं॥आनीलनिषधायामो
मौमाल्यवान्गंधमादनः॥५२॥मध्यतयामेरुशैलःकर्णिकापंकजेयथा॥भा
रतंकेतुमालंचभद्राश्वंकुरवस्तथा॥५३॥पत्राणिलोकपद्मस्यमर्यादाशैलतो ॥राम॥
बहिः॥देवकूटश्चनिषधाद्दक्षिणोत्तरमायतौ॥५४॥मर्यादापर्वतौह्येतौके ॥२५॥

ल्लासोगंधमादनः॥नवतियोजनायामौपूर्वापरमहोदधिं॥५५॥स्पृष्टांतौपा
रियात्रश्चनिषधावधिभूभृतौ॥मेरोपश्चिमभूभागेयथापूर्वौतथास्थितौ॥५
पूर्वोत्तरश्चशृंगीनोपर्वतोमरुभूभृतः॥उत्तरेणस्थितौप्राप्यपूर्वापरमहोदधिं॥
५७॥पर्वतानामवस्थानमानंस्यात्प्रपंच्यते॥शैलानामंतरद्रोण्यःसेव्यंतेसि
द्धचारणैः॥५८॥अन्यैश्चपुण्यकृद्यक्षादैत्यदानवकिंनरैः॥भौमास्तेनाकलास्व
र्गौदुर्लभापापकर्मभिः॥५९॥ज्ञानमूर्तिर्हयग्रीवोभद्राश्वेनतसंस्तये॥वर्षेषु
मूर्तयोविष्णोमयादापर्वतेषुच॥६०॥वसंतिलोकरक्षायैनानारूपविशेषिता
यानिकिंपुरुषादीनिवर्षाण्येतानिपश्चज॥६१॥निरातंकाप्रजाशस्तेतत्रशोका
नभयंतथा॥नोदन्यानबुभुक्षाचनदर्पानायुषःक्षयः॥६२॥संतिनर्षांसहस्रा
णिवर्षाणिद्वौचविंशतिः॥आयुर्नंतेषुदेशेषुभौमसंभानवर्षति॥६३॥देवा
नवर्तभेदोस्तिनकालोयुगभेदवान्॥सदाकृतयुगःकालोवर्ततेचतुराननः॥
॥६४॥धर्मश्चतुष्पात्सकलोध्यानमर्चानतहरेः॥पर्वताश्चसरितश्चापितत्र

॥पद्म० ॥२५॥ अपुराणिच॥५५॥ग्रामाश्रमंनिबद्धश्चस्वधर्मनिरताःसदा॥ब्राह्मणाभूमिप
श्चापिप्रजापालनतत्पराः॥५६॥स्वेस्वेकर्मण्यभिरताश्चातुर्वर्ण्यमवस्थितं॥
चातुराश्रम्यमप्येवंयथोक्तमवतिष्ठते॥५७॥इतिश्रीपंचरात्रेमहोपनिषदि
पाद्मतंत्रेज्ञानपादेजंबूद्वीपादिप्रमाणवर्णनंनामनवमोध्यायः॥९॥५॥श्री
भगवानुवाच॥आदाक्षिणात्यादंभोधेराशैलाद्धिमालयात्॥देशोयंभार
तंवर्षंभूरेषाकर्मणांनृणां॥१॥योजनानिसहस्राणिविस्तारेणचकथ्यते॥स्व
र्गापवर्गफलदंकर्मकार्यंनृणामिह॥२॥सह्योमहेंद्रोमलयःशुक्तिमानृक्षना
मवान्॥विंध्यश्चपारियात्रश्चसप्तैतेकुलपर्वताः॥३॥इहैवक्रियमाणस्यकर्म
णोनरकंफलं॥वर्षेष्वन्येषुसर्वेषुकेवलंभुंजतेफलं॥४॥इहैवचातुराश्रम्यं
चातुर्वर्ण्यंव्यवस्थितिः॥कृतादियुगभेदानांचतुर्णामिहसंभवः॥५॥दानंय
ज्ञंतपोमर्त्याःपरलोकफलार्थिनः॥इहकुर्वंतियज्ञेशंयजंतेपुरुषोत्तमं॥६॥ ॥राम॥
अपवर्गंतद्भारतेवर्षेसर्ववर्षेषुसंभवं॥फलार्थिनःकामयंतेकर्मभूयुजनिंबु- ॥२५॥

ष्या:॥७॥सहस्राणितथैवास्मिंदिव्यानिपुरुषःपरः॥आस्तेधामानितन्यस्य
पुण्यानिसंतिसहस्रशः॥८॥ग्रामाःपुरःपत्तनानिभवंतिचपरंतानं।द्वीपेपु-
पद्मसहस्रेषुसंतिवर्षाणिसप्तवै॥९॥प्रत्येकंसप्तचात्रैवभवंतिकुलपर्वताः
वर्णानामाश्रमाणांचभेदास्तत्रव्यवस्थिताः॥१०॥अंतिमपुष्करद्वीपमानसो
त्तरभूधरः॥मध्यवलयवद्भातितस्याख्यायाभिधीयते॥११॥योजनानांस-
हस्राणिपंचाशतसमुन्नति।तावदेवास्यविस्तारोद्वीपंतद्विभजंतव॥१२
स्थितःशैलवरोत्रसद्वर्षपरिमंडले।शैलस्यांतमानसस्यबहिर्व्यसदृशोऽ-
भो॥१३॥तन्मूर्ध्निलोकपालानांमिंद्रादीनायथापुरं।पुरःसंतिपुरंतासांनामा
न्यपियथापुरं॥१४॥देवानामपिचान्येषांतत्रसंतिपृथक्पुरः॥असंख्याता
ब्रह्मणश्चपुरंभवतिपुष्करे॥१५॥स्वादुस्वादोदकेपूर्णोवारिधिःपुष्करा-
द्बहिः॥तेनतद्वेष्टितंद्वीपंयथान्यार्णवांतरैः॥१६॥स्वादूदकाद्बहिर्भूमि
सर्वांचैवहिरण्मयी।तपनीयमयात्रास्तन्लोकालोकाचलोबहिः॥१७